# ☆ Oriental Thought ☆

FEB 15 1963
X-I

A Sanskrit-English Quarterly devoted to research work in all fields of
Oriental literature conducted under the guidance of
H. H. Jagadguru Śrī Saṅkarācārya (Dr. Kurtkoti)

श्रृण्वन्तु विश्वे अमृतस्य पुत्रा
आ ये धामानि दिव्यानि तस्थुः ॥ –श्वेताश्वतरोपनिषद्

Vol. VI) March 1962 (No. 1

Editor :
Dr. G. V. Devasthali,
M. A., B. T., Ph. D.

Managing Editor :
Dr. V. P. Mahajan,
M. A., Ph. D.

Annual subs. inland Rs. 8 (Postage Extra) Foreign 16 Shillings
Each number separately sold for Rs. 2–50

## General Instructions to Contributors

1. Contributions should be type-written (with double spacing) on only one side of the paper.

2. Lengthy extracts and quotations from the original Sk. and Pk. works should be written in Devanāgari characters. In other cases the system of transliteration adopted by the Bhandarkar Oriental Research Institute should be followed.

3. Names of modern authors should be indicated in the manuscripts by double underlining. Titles of books and journals should be indicated by single underline. Titles of articles mentioned in the contributions should be enclosed within double quotation marks.

4. Footnotes should be serially numbered and should be given all of them at the end of the article (and not on each page).

5. It is presumed that contributions sent for publication in 'Oriental Thought' are original and not submitted for publication elsewhere.

6. The copy-right of all contributions published in Oriental Thought will vest jointly in the Author and the (proposed) Academy.

7. Ten off-prints will be given to contributors free of charge.

8. All communications, contributions, book-notices, books for review etc. should be addressed to the Managing Editor, 'Oriental Thought' 567 Sadashiv Peth, Poona 2.

*Oriental Thought Series No. 9*

# शङ्करविजयसङ्ग्रहः

Śaṅkar-Vijaya-Saṅgrahah

*by*

**Puruṣottama Bhāratī**

Edited with Introduction

*by*

**W. R. Antarkar,** M. A., Ph. D.

# INTRODUCTION

It is proposed to publish some rare and unpublished manuscripts of biographies of Śrī Śaṅkarācārya, procured by us during our research on the life of that great man. The dates of these works cannot always be fixed with certainty. An attempt to do so has, however, been made wherever possible.

The first Ms. selected for publication is *Śaṅkara-Vijaya-Saṅgraha* by *Puruṣottama Bhāratī*. It has been so selected not because it is very important but because it is, in addition to being rare and comparatively very short, particularly unusual in its account of Saṅkara's life.

The present edition of the work is based on the transcript copy of the same furnished to us by the Mss. Library of the Oriental Research Institute, Mysore, though we have also used another copy thereof available with Swāmī Saccidānanda Saraswatī of Adhyātma Prakāśa Kāryālaya, Holenarsipur, Mysore State. Ch. IV of the work, as given in the latter manuscript copy, is substantially different from the one in the former and hence the same is given by us as Appendix A.

Nothing absolutely is known about the author of the work. His name also is gathered from the Catalogue of Mss. of the said Institute only. No other information about him is also available from any other source. Similarly, there is no clue whatsoever to the author's date though he mentions previous poets in the field.

The name of the work is gathered from the same catalogue and also from the colophons at the end of the chapters. The copy of the work in the hands of the above-mentioned Swāmījī bears a variant name viz. Kūṣmāṇḍa-Śaṅkara-Vijaya for the work. The name is evidently given after the Kūṣmāṇḍa which is said to be responsible for Śaṅkara's birth. The work contains six chapters and except for the five concluding stanzas of the first five chapters is throughout written in Anuṣṭubh metre with a sprinkling of prose in Ch.IV. The style is quite simple and unembellished. There is hardly any poetical excellence worth mentioning.



The version of Śaṅkara's life is, as stated already, very unusual in many parts and hence a short summary of the same is given below :

Lord Śiva, disguised as a Bhikṣu, came down to the earth for inspection and finding that the Vedic rites were given up by the brahmins, who were following other practices, felt it necessary to take birth and set matters right. Coming to Kālaṭī, He came across a widow, devoted to God. On seeming Him she offered Him salutation and asked Him who He was. He disclosed to her His identity and also His intention to take birth there only. He then gave her a seed of Kūṣmaṇḍa fruit, to be placed at the bottom of a pillar and watered, without plucking its flower or fruit and disappeared. (Chapter I).

The lady did as instructed and in course of time a fruit appeared on the tree. The fruit automatically fell down and a child came out of it. The widow took it home and nursed it. Her neighbours questioned her about it but would not believe her story which she narrated to them honestly. They doubted her chastity and left her in anger. She continued to nurse the child. In the meantine, Bṛhaspati came and taught the child all the Vedas, Scriptures and Purāṇas. The child then became a Sannyāsin and went to Govindamuni, the disciple of Gaudapada and became a self-realised person.

Chapter III relates different events in Śaṅkara's life, like writing Bhāṣyas, encounter with Vyāsa, seeing his mother at death and cremating her body by calling Gods to his aid, cursing the local brahmins, acquisition of disciples (Viṣṇuśarman is identified Sanandana) and etc. Chapter IV deals with Śaṅkara's encounter with Maṇḍana at Siddhapurī and Chapter V describes his encounter with Maṇḍana's wife and para-kāyā-praveśa. Śaṅkara defeated the wife and asked her to follow him. She agreed on condition that if he looked back, she would go back to her abode. When, however, Saṅkara had gone as far as Pampāpura, he looked back to see that she was following him. There upon, Vāṇī immediately took his permission and disappeared. Then, after visiting Rāmasetu, Śaṅkara returned to his divine abode.

No serious criticism of this version is necessary. The story of Śaṅkara's birth from a Kūṣmāṇḍa fruit easily reminds us of similar stories of the births of the various mystics of the Navanātha Sampradāya. The story further contains the germs of the later-day stories of the unchastity of Śaṅkara's mother and of his consequent illegitimacy. Lastly, this is the only account of Śaṅkara's life to omit the story of his encounter with Kumārila Bhaṭṭa. Altogether, we cannot rely upon the version, novel in many details as it is, except for some commonly accepted facts.

---

# ॥ शङ्करविजयसङ्ग्रहः ॥

## श्रीसद्गुरुचरणारविन्दाभ्यां नमः । हरि ॐ ।

प्रत्यूहध्वान्तनिकरनिवारणदिवाकरम् ।
भक्ताभीष्टप्रदातारं नमामि द्विरदाननम् ॥१॥

वाग्देवी रसनारङ्गे मम नृत्यतु सर्वदा ।
राकासुधाकरस्वच्छदिविषद्वृन्दवन्दिता ॥२॥

वदामि शङ्कराचार्यसमुत्पत्तिकथामहम् ।
हितार्थं सर्वलोकानां शृण्वतां पापनाशनम् ॥३॥

पुरा भूमण्डले कश्चिद्देशः केरलसंज्ञकः ।
धनधान्यसमृद्धिश्च संवृतो बहुभिर्जनैः ॥४॥

इडा नाम नदी तत्र सर्वपापप्रणाशिनी ।
मरुद्विधा नाम महातटिनी च विराजिता ॥५॥

चूर्णीति प्रथिता लोके तटिनी पुण्यदा परा ।
देवालया आश्रमाश्च तत्तीरे निवसन्ति हि ॥६॥

प्रख्यातं पृथिवीमध्ये पद्मनाभस्य मन्दिरम् ।
सर्वेषामेव लोकानां दर्शनादेव मुक्तिदम् ॥७॥

महत्तत्र प्रविख्यातं क्षेत्रं कालटिसंज्ञया ।
पुष्पितैः फलितैर्वृक्षैर्विविधैरुपशोभितम् ॥८॥

कैलासाधिपतिः शम्भुः कदाचिद्वीक्षणेच्छया ।
सर्वलक्षणसम्पन्नो भिक्षुरूपं समाश्रितः ॥९॥

चरन् कलियुगे भूमौ जनान् पापरतान् बहून् ।
ब्राह्मणान् क्षत्रियान् वैश्यान् स्वधर्माचारवर्जितान् ॥१०॥

कांश्चिच्छम्भुरतान्नित्यं कांश्चिद्विष्णुपरायणान् ।
कांश्चित्त्रिशूलहस्तांश्च कांश्चित्कामपरायणान् ॥११॥

भैरवोपासकान् कांश्चित्कांश्चिद्गणपतिप्रियान् ।
कांश्चिच्छक्तिमतस्थांश्च कांश्चित्कापालिकानपि ॥१२॥

चार्वाकानपि तत्रैवं कांश्चित्सौरमतस्थितान् ।
शिवपाषण्डिनः कांश्चिद्विष्णुपाषण्डिनस्तथा ॥१३॥
वेदाग्निहोत्रहीनांश्च दृष्ट्वा शम्भुर्महीतले ।
विलोक्य कालटिक्षेत्रं सुप्रसिद्धं मनोहरम् ॥१४॥
आविर्भूयाऽत्र दुष्टानां कर्तव्यो निग्रहो मया ।
इत्यालोच्य तदा स्नात्वा कालटिक्षेत्रमाविशत् ॥१५॥
इदानीं शर्वयतिनं दृष्ट्वैव गतभर्तृका ।
देवपूजापरा नित्यं शिवभक्तिपरायणा ॥१६॥
प्रातस्स्नानार्थमायान्ती भिक्षुरूपधरं शिवम् ।
प्रणिपत्याऽथ पप्रच्छ कस्माद्देशात्समागतः ॥१७॥
ईश्वरोः– आगतोऽहं महाभद्रे कैलासाधिपतिश्शिवः ।
आविर्भवामि चाऽत्रैव सेवां कर्तुमिहाऽर्हति ॥१८॥
इत्युक्त्वा खलु कूष्माण्डबीजमेकं प्रदाय च ।
तद्रक्षणाय यत्नेन स्तम्भमूले प्रणिक्षिप ॥१९॥
जलमासिच्य तन्मूले वल्लीं पुष्पं फलं तथा ।
न छेदय फलं पक्वं (स्वयमेव) पतिष्यति ॥२०॥
इत्युक्त्वाऽन्तर्दधे शम्भुः कैलासमगमत्क्षणात् ।
भूलोके विमतानां च सर्वेषां खण्डने रतः ॥२१॥
सर्वेश्वरः सर्वमयो विधाता सर्वज्ञमूर्तिः करुणासमुद्रः ।
महीसुराणां परिरक्षणार्थमाविर्भवत्साम्बशिवश्चिदात्मा ॥२२॥
॥ इति श्रीशङ्करविजयसङ्ग्रहे ईश्वरोपदेशो नाम प्रथमोऽध्यायः ॥

---

## ॥ श्रीशिवाय नमः ॥

सा बीजं च ततः सम्यक् स्तम्भमूले निधाय च ।
जलमासिच्य यत्नेन ररक्ष सुचिरं मुदा ॥१॥
फलमेकं तदा पक्वं स्तम्भाग्रान्निपपात ह ।
फले च पतिते तत्र महापुरुषमीश्वरम् ॥२॥



दृष्ट्वा बालकमादाय संररक्ष प्रयत्नतः ।
तदानीं बालरुदितं श्रुत्वा तत्राऽखिला जनाः ॥३॥
आगत्य तद्गृहं शीघ्रं ते बालां तामथाऽब्रुवन् ।
अपुत्रायास्तव कथं बाल एष समागतः ॥४॥
इत्थं जनवचः श्रुत्वा साऽब्रवीद्भयविह्वला ।
इहाऽगत्य यतिः कश्चिद्बीजमेकं प्रदत्तवान् ॥५॥
रक्षेत्युक्त्वा ततो भिक्षुर्मया तत्परिरक्षितम् ।
तत्र जातात्फलात्सद्यः पतित्वादेष बालकः ॥६॥
लब्धश्चान्यं न जानेऽहमिति श्रुत्वा च ते जनाः ।
नारीं निर्भर्त्स्य कोपेन सर्वेऽपि स्वगृहं ययुः ॥७॥
ततः सा बालकं सम्यगतिहर्षादपालयत् ।
एतस्मिन्नन्तरे काले समागत्य बृहस्पतिः ॥८॥
वेदशास्त्रपुराणानि सर्वाण्युपदिदेश ह ।
ततः स वेदशास्त्रार्थपुराणादिषु दक्षताम् ॥९॥
अगमच्च ततः सम्यग्दिव्यज्ञानी तदाऽभवत् ।
ततः संन्यासमादाय यतवान् गुरुसंनिधौ ॥१०॥
गौडपादाभिधानस्य शिष्यः सर्वविदां वरः ।
गोविन्दभगवान् प्रीत्या बालस्योपादिशन्मनुम् ॥११॥
गुरुप्रसादेन महानुभावो महान् यशस्वी सुगुणप्रभावः ।
वेदान्तविज्ञानसुनिश्चितार्थोऽभवत्पृथिव्यां सुजनप्रकृष्टः ॥१२॥
॥ इति श्रीशङ्करविजये श्रीशङ्कराचार्योत्पत्तिर्नाम द्वितीयोऽध्यायः ॥

---

## ॥ श्रीशिवाय नमः ॥

ततः स शङ्करो नाम भगवाँल्लोकविश्रुतः ।
लोकदीक्षागुरुर्योगी महाभूतिप्रदायकः ॥१॥
तीर्थयात्रार्थमेकाकी संचरन् पृथिवीतले ।
गतवान्निस्पृहः शान्तः क्षिप्रं बदरिकाश्रमम् ॥२॥

उषित्वा सुचिरं तत्र श्रीमद्भाष्यं चकार सः ।
सन्तुष्टं तत्र सम्प्राप्तं वेदव्यासं ददर्श सः ॥३॥
ततो मात्रा स्मृतस्तस्मात्स्वजनागारमाप सः ।
नत्वाऽथ मातरं स्वीयामासन्नमरणं स्मृतः ॥४॥
किमर्थं ब्रूहि मे मातराज्ञापय करोमि किम् ।
(माता) आपत्काले स्मृतस्त्वं हि यथेच्छसि तथा कुरु ॥५॥
इत्युक्त्वा पुत्रमालिङ्ग्य देहं त्यक्त्वा दिवं गता ।
ततो मातुः क्रियार्थं तु तत्रत्याः ब्राह्मणोत्तमाः ॥६॥
आहूता अपि नायाताः शापं दत्वा ततो गुरुः ।
तदा देवान् समाहूय दाहयामास तैः सह ॥७॥
मातुर्देहं ततः सर्वां क्रियां निर्वर्त्य ते गताः ।
आचार्यमतुलं दृष्ट्वा तत्रत्या ब्राह्मणोत्तमाः ॥८॥
तदाप्रभृति शापेन निष्कुटि प्रदहन्ति च ।
शङ्करो भगवत्पूज्यो गत्वा बदरिकाश्रमम् ॥९॥
संन्यासं कारयामास द्विजातेर्विष्णुशर्मणा ।
ददौ सनन्दनाभिख्यां सोऽन्त्याश्रममुपाश्रितः ॥१०॥
पद्मपादाभिधानं च वितीर्णं दैवतैः पुनः ।
आचार्यस्तेन शिष्येण प्रयागं तीर्थमागतः ॥११॥
तत्र स्नात्वा पुनर्गच्छन् ददर्श द्विजनन्दनम् ।
सन्तुष्टहृदयोऽत्यर्थमाचार्यः पञ्चवर्णिनम् ॥१२॥
स्वतो लब्ध्वाऽमलज्ञानं निनायाऽश्रममन्तिकम् ।
द्वितीयस्तस्य शिष्योऽभूद्धस्तामलकसंज्ञया ॥१३॥
तृतीयस्तोटकाख्योऽभूदेकः शिष्योऽस्य तत्परः ।
शिष्यैस्त्रिभिः समेतोऽभूद्गच्छन पथि शनैः शनैः ॥१४॥
मोदादुपनिषद्वाक्यैः स्वसेवार्थमिहागतैः ।
तीर्थानि सेवमानोऽथ शिष्यैः सार्धं महात्मभिः ॥१५॥
तत्र तत्र स्थितान् दृष्ट्वा विमताचारतत्परान् ।
विजेतुं समयोऽद्येति निश्चित्यैवं स्वतेजसा ॥१६॥



कापालिकांश्च चार्वाकान् तथा पाशुपतानपि ।
इत्यादिकान् विरुद्धांश्च सर्वान् दुष्टमतस्थितान् ॥१७॥
श्रुतिस्मृतिपुराणैश्च युक्तिभिर्बहुभिस्तथा ।
वादे विजित्य तत्रैवं चक्रे धर्मपरायणान् ॥१८॥
तदा प्रभृति सर्वे च ब्राह्मणाः क्षत्रिया विशः ।
स्वधर्मनिरता भूमावभवन् कीर्तिशालिनः ॥१९॥
वर्णाश्रमाचारविशालदक्षः । श्रीशङ्करो लोकहिताय योगी ।
चरत्यवन्यां विमतान् विजित्य । शिष्यैः समस्तैः परिगीयमानः ॥२०॥

॥ इति श्रीशङ्करविजयसङ्ग्रहे विमतविजयो नाम तृतीयोऽध्यायः ॥

## ॥ श्रीशिवाय नमः ॥

ततो गतः पुनर्देशे क्षिप्रं सिद्धपुरीं प्रति ।
सर्ववेदार्थनिपुणैः सर्वशास्त्रविशारदैः ॥१॥
अग्निहोत्ररतैः शान्तैरन्वितां विप्रसत्तमैः ।
तत्रैको ब्राह्मणश्रेष्ठः स्थितो मण्डनमिश्रकः ॥२॥
शास्त्रवादेषु निपुणः साक्षाद्ब्रह्मांशसम्भवः ।
तस्य भार्या सुशीलाख्या वाणी परमशोभना ॥३॥
एवं स्थिते तदा तस्य पितुर्दिवमुपस्थितम् ।
निमन्त्र्य व्यासमेकं तु सालग्रामं द्वितीयकम् ॥४॥
पाद्यप्रदानसमये गतवान् शङ्करः स्वयम् ।
पाद्यस्थाने स्वकीयौ द्वौ पादौ निक्षिप्य च स्थितम् ॥५॥
दृष्ट्वा मण्डनमिश्रस्तु कोपं चक्रे स दुर्मतिः ।
कन्थां वहसि दुर्बुद्धे गर्दभेनाऽपि दुर्भराम् ॥६॥
शिखायज्ञोपवीताभ्यां कस्ते भारो भविष्यति ।
**श्रीशङ्करः**—कन्थां वहामि दुर्बुद्धे तव पित्राऽपि दुर्भराम् ॥७॥
शिखायज्ञोपवीताभ्यां श्रुतेर्भारो भविष्यति ।
इति श्रुत्वा पुनः प्राह क्रोधेन महताऽवृतः ॥८॥

सुरा पीता वा । नहि न हि, सुरा श्वेता । किं मत्तः । किं गृहस्थः । किं पापिष्ठः । त्वत्पिता । किं भ्रष्टः । त्वमनाचारः । किमाश्रमरहितः । त्वमाश्रमभ्रष्टोऽसि । किं जातिरहितः । त्वं जात्यन्धोऽसि । किं ब्राह्मण्यरहितः । त्वं ब्रह्म न जानासि । किं दुराचारः । त्वमाश्रमभ्रष्टोऽसि । किं जातिरहितः । किं जात्यन्धोऽसि । किं शिखारहितः । त्वं शिखास्वरूपं न जानासि । त्वमुपवीत-रहितः । त्वमुपवीतस्वरूपं न जानासि । किं दूषकः । त्वत्पाञ्चभूतिकदेहः । किं कर्मभ्रष्टः । त्वं कर्मस्वरूपं न जानासि । किं मार्गरहितः । त्वं श्रुतिमार्गं न जानासि । इत्याद्युत्तरप्रत्युत्तरवाक्यं श्रुत्वान् व्यासः स्वयमुक्तवान् । अरे मूढात्मन् मण्डनमिश्र किमिदमुच्यते । साक्षाच्छङ्करः समागतः । त्वं कृतार्थोऽसि । पाद्यं दीयताम् । इति श्रुत्वा ततो मण्डनमिश्रः समुत्थाय भिक्षार्थ-मागन्तव्यमिति प्रोक्तवान् ॥ ततः शङ्करः पुनर्मण्डनमिश्रं प्रति अरे मण्डनमिश्र, अन्नभिक्षार्थं नागतः, किन्तु वादभिक्षार्थमागतोऽस्मीति भणितवान् ॥ ततः शङ्करवचनमाकर्ण्य, भो यतिवरेण्य, ममापराधं क्षन्तुमर्हसि । अद्य पितुर्दिनम् । श्वः स्नानानन्तरं भविष्यति । इति वचनमङ्गीकृत्य शङ्करस्तथा भवत्विति निर्गत्य शिष्यैः सह भिक्षामटित्वा तत्रैव तद्दिनं स्थितवान् ॥

ततः कर्मादिकं कृत्वा शिष्यैः सह समागतः ।
गृहं मण्डनमिश्रस्य शङ्करो लोकशङ्करः ॥९॥
वादार्थमागतोऽस्मीति वाक्यं श्रुत्वा समाहितः ।
नमस्कृत्य स तं प्राह यथेच्छसि तथा कुरु ॥१०॥
साक्षी को वा प्रसङ्गेऽस्मिन् वादिनोरुभयोरपि ।
इति श्रुत्वा शङ्करोऽपि पुनः प्राह च तं प्रति ॥११॥
अवयोरुभयोर्वादे तव पत्न्येव साक्षिणी ।
पराजयो यदि मम गार्हस्थ्यं मे भवेदिति ॥१२॥
पराजयो यदि तव संन्यासित्वं भवेदिति ।
प्रतिज्ञा चाऽभवत्तत्र वादिनोरुभयोरपि ॥१३॥

**मण्डनमिश्र :–** अश्वालम्भं गवालम्भं संन्यासः पलपैतृकम् ।
देवरेण सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥१४॥
इत्यादि बहुधा वादे वेदशास्त्रादिषु क्रमात् ।
प्रोक्तं मण्डनमिश्रेण श्रुत्वा प्राह स शङ्करः ॥१५॥
यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते ।
संन्यासश्चाग्निहोत्रं च तावदेव कलौ युगे ॥१६॥
सशिखं वपनं कृत्वा बहिः सूत्रं त्यजेद्बुधः ।
यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत् ॥१७॥



सूत्रनात्सूत्रमित्याहुः सूत्रं नाम परं पदम् ।
तत्सूत्रं विदितं येन स विप्रो वेदपारगः ॥१८॥
ज्ञानशिखा ज्ञाननिष्ठाः ज्ञानयज्ञोपवीतिनः ।
ज्ञानमेव परं तेषां पवित्रं ज्ञानमुच्यते ॥१९॥
अग्नेरेव शिखा नाऽन्या यस्य ज्ञानमयी शिखा ।
स शिखीत्युच्यते विद्वान्नेतरे केशधारिणः ॥२०॥
कुटुम्बं पुत्रदारांश्च वेदाङ्गानि च सर्वशः ।
यज्ञं यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः ॥२१॥
इत्यादि बहुधा वादं श्रुत्वा वाणी तु साक्षिणी ।
भर्तुः पराजयं दृष्ट्वा भिक्षार्थं तावुभावपि ॥२२॥
उत्तिष्ठतमिति प्राह वन्दित्वा विनयान्विता ।
ततो मण्डनमिश्रस्य संन्यासं विधिना गुरुः ॥२३॥
लोके सुरेश्वराभिख्यां कारयामास शङ्करः ॥२४॥
शिष्यैः समस्तैः परिसेव्यमानः । समागतः सिद्धपुरं प्रसिद्धम् ।
जित्वा ययौ मण्डनमिश्रसंज्ञम् । जेष्यामि वाणीमिति मोदमानः ॥२५॥

इति श्रीशङ्करविजयसङ्ग्रहे मण्डनमिश्रजयो नामः चतुर्थोऽध्यायः ॥

---

## ॥ श्रीशिवाय नमः ॥

ततो वाणी पतिं भिक्षुं दृष्ट्वा कोपसमन्विता ।
शङ्करं प्राह वचनं शास्त्रवादजिगीषया ॥१॥
शास्त्रे मां जयसि त्वं चेदागच्छामि त्वया सह ।
इत्यन्योन्यं प्रतिज्ञाय चक्रतुर्वादमद्भुतम् ॥२॥
तदा प्रपच्छ तं वाणी विजिताखिलसूरिणी ।
भवताऽद्य यतिश्रेष्ठ ज्ञाताः कामकलाः किमु ॥३॥
इति वाण्या सुसंपृष्टः पुनस्तामेवमुक्तवान् ।
अस्योत्तरमहं वाणि भामिन्यष्टमवासरे ॥४॥
वक्ष्यामीति ततो गत्वा जिज्ञासुर्मर्मधीः कलाः ।
स्वदेहरक्षणे शिष्यानादिश्य चतुरो गुरुः ॥५॥

गतासोः कस्यचिद्देहं प्रविवेशाऽवनी पतेः ।
उषित्वा राजयोषिद्भिः सार्धं राजगृहेषु च ॥६॥

कामशास्त्रस्य तत्त्वज्ञः स्वदेहं प्राप्तवान् पुनः ।
भूयो गत्वा सरस्वत्या दत्वा चोद्योत्तराण्यपि ॥७॥

सुविस्मितैः सभासद्भिरत्यर्थं मानितस्तदा ।
वाणीं प्राह मुदा युक्तः समागच्छ मया सह ॥८॥

इति श्रुत्वा गुरोर्वाक्यं वाणी तु समभाषते ।
आगच्छामि त्वया सार्धं पश्चान्मां नावलोकय ॥९॥

आलोकयसि चेत्त्वं हि गच्छामि भवनं मम ।
तथेत्युक्त्वा पुरो गच्छन् गुरुः पम्मापुरं प्रति ॥१०॥

आयाति वा न वेतीति पश्चाद्भागे प्रदृष्टवान् ।
तदा गत्वा गुरुं गन्तुमनुज्ञां दातुमर्हसि ॥११॥

इत्युक्त्वा तु ततोऽदृश्या ब्रह्मलोकमवाप सा ।
भुवं प्रदक्षिणीकृत्य जित्वा तत्र सुदुर्मतान् ॥१२॥

षण्मतं स्थापयामास पृथिव्यां शङ्करो गुरुः ।
शैवं च वैष्णवं शाक्तं सौरं वैनायकं तथा ॥१३॥

स्कान्दं च भक्तिमार्गस्य दर्शनानि षडेव हि ।
एवं क्रमेण सकलं षण्मतोद्धारणं क्रमात् ॥१४॥

कृत्वा जित्वा च विमतान् रामसेतुमवाप सः ।
ततः शिष्यैः परिवृतो वृषाद्रीशं गुरुर्ययौ ॥१५॥

स्वायुषोऽन्तं स विज्ञाय नत्वा तत्रत्यदेवतः ।
भक्त्या कुर्वन् हरिस्तोत्रं शिवलोकमवाप सः ॥१६॥

सुरेश्वराभिधो योगी सत्यलोकमवाप सः ।
पद्मपादाभिधो भिक्षुः प्राप्तवान् वैष्णवं पदम् ॥१७॥

हस्तामलकसंज्ञस्तु शक्रलोकमवाप्तवान् ।
ययौ तोटकयोगी तु सूर्यलोकमनुत्तमम् ॥१८॥

एवं शिष्यास्तु चत्वारस्तत्तदेवांशसम्भवाः ।
स्वं स्वं स्थानं क्रमेणैव शङ्करानुग्रहाद्ययुः ॥१९॥



ईदृशं शङ्कराचार्यचरितामृतमद्भुतम् ।
श्रोतव्यं कीर्तितव्यं च भक्त्या सर्वैर्मनीषिभिः ॥२०॥

सकलभुवनकर्ता सर्वपापैकहर्ता । सुजननिचयभर्ता बालचन्द्रस्य धर्ता ।
अखिलमुखविधता सर्वलोकैकनेता । रजतगिरिषु याता शङ्करः श्रीप्रदाता ॥२१॥

॥ इति श्रीशङ्करविजयसङ्ग्रहे शङ्कराचार्यचरित्रवर्णनं नाम पञ्चमोऽध्यायः ॥

---

## ॥ श्रीशिवाय नमः ॥

शम्भुः कृतयुगे जातः पञ्चास्यः पञ्चभिर्नखैः ।
हिरण्यकशिपोर्वक्षोविदारणमथाऽकरोत् ॥१॥

त्रेतायुगे तु हनुमान् पञ्चास्य सन् महेश्वरः ।
रावणस्यैव हननं कृतवान् सर्वरक्षकः ॥२॥

आकर्णय मुने पूर्वं पञ्चवक्त्रो हरः स्वयम् ।
पृथिव्यां पञ्चधा भूत्वा प्रादुरासीज्जगद्गुरुः ॥३॥

उमाऽपि च जगद्धात्री द्रुपदस्य महीभुजः ।
यजतो वह्निकुण्डाच्च प्राविश्चक्रेऽतिसुन्दरी ॥४॥

पञ्चापि पाण्डुतनयाः साक्षाद्रुद्रवपुर्धराः ।
अवतेरुरिव स्वर्गाद्दुष्टसंहारकारिणः ॥५॥

नारायणोऽपि कृष्णत्वं प्राप्य तत्साहचर्यकृत् ।
पञ्चाऽपि पाण्डुतनया भिक्षुरूपमुपाश्रिताः ॥६॥

विरुद्धानां मतानां हि निग्रहाय कलौ युगे
शङ्करो धर्मपुत्रस्तु पद्माङ्घ्रिर्वायुनन्दनः ॥७॥

सुरेश्वराभिधो भिक्षुरर्जुनो नकुलस्तथा ।
हस्तामलकयोगीन्द्रः सहदेवस्तु तोटकः ॥८॥

॥ इति श्रीशङ्करविजयसङ्ग्रहे शङ्करविजयो नाम षष्ठोऽध्यायः ॥

॥ श्रीगुरुचरणारविन्दार्पणमस्तु ॥

॥ समाप्तोऽयं ग्रन्थ ॥

## Appendix A

( Text of Ch. IV of the work procured from Adhyātma Prakāśa Kāryālaya, Holenarsipura, Mysore State )

ततो गतः पुनर्देशे क्षिप्रं सिद्धपुरीं प्रति ।
सर्ववेदार्थनिपुणैः सर्वशास्त्रविशारदैः ॥१॥
अग्निहोत्ररतैः शान्तैरन्वितां विप्रसत्तमैः ।
तत्रैको ब्राह्मणश्रेष्ठः स्थितो मण्डनमिश्रकः ॥२॥
सर्वत्रेदार्थतत्त्वज्ञस्तुरीयाश्रमदूषकः ।
शास्त्रवादेषु निपुणः साक्षात्ब्रह्मांशसम्भवः ॥३॥
तस्य भार्या सुशीलाख्या वाणी परमशोभना ।
एवं स्थिते तदा तस्य पितुर्दिनमुपस्थितम् ॥४॥
निमन्त्र्य व्यासमेकं तु सालग्रामद्वितीयकम् ।
पाद्यप्रदानसमये गत्वा श्रीशङ्करः स्वयम् ॥५॥
पाद्यस्थाने स्वकीयौ द्वौ पादौ निक्षिप्य च स्थितम् ।
दृष्ट्वा मण्डनमिश्रस्तु कोपं चक्रे सुदुर्मतिः ॥६॥
कुतो मुण्डयागलान्मुण्डी पन्थास्ते पृच्छ्यते मया ।
किमाह पन्थास्त्वन्माता मुण्डेत्याह तथैव हि ॥७॥
पन्थानं त्वमपृच्छस्त्वं पन्थाः प्रत्याह मण्डन ।
अहो पीता किमु सुरा नैव श्वेता यतः स्मर ॥८॥
किं त्वं जानासि तद्वर्णमहं वर्णं भवान्रसम् ।
कन्थां वहसि दुर्बुद्धे गर्दभेनाऽपि दुर्भराम् ॥९॥
शिखायज्ञोपवीताभ्यां कस्ते भारो भविष्यति ।
कन्थां वहामि दुर्बुद्धे तव पित्राऽपि दुर्भराम ॥
शिखायज्ञोपवीताभ्यां श्रुतेर्भारो भविष्यति ॥१०॥
त्यक्त्वा पाणिगृहीतिं स्वामक्त्या परिरक्षणे ।
शिष्यपुस्तकभारेच्छोर्व्याख्याता ब्रह्मनिष्ठता ॥११॥
गुरुशुश्रूषणालस्यात्समावर्त्य गुरोः कुलात् ।
स्त्रियः शुश्रूषमाणस्य व्याख्याता कर्मनिष्ठता ॥१२॥
स्थितोऽसि योषितां गर्भे ताभिरेव विवर्धितः ।



अहो कृतघ्नता मूर्ख कथं ता एव निन्दसि ॥१३॥
यासां स्तन्यं त्वया पीतं यासां जातोऽसि योनितः ।
तासु मूर्खतम स्त्रीषु पशुवद्रमसे कथम् ॥१४॥
क्व ब्रह्म क्व च दुर्मेधा क्व संन्यासः क्व वा कलिः ।
स्वाद्वन्नभक्ष्यकामेन वेषोऽयं योगिनां धृतः ॥१५॥
क्व स्वर्गः क्व दुराचारः क्वाऽग्निहोत्रं क्व वा कलिः ।
मन्ये मैथुनकामेन वेषोऽयं कर्मिणां धृतः ॥१६॥

व्यासः स्वयमुक्तवान्—

अरे मूढ त्वं मण्डनमिश्र, किमिदमुच्यते । साक्षाच्छङ्करः समागतः । त्वं कृतार्थोऽसि । पाद्यं दीयताम् । इति श्रुत्वा ततो मण्डनमिश्रः समुत्थाय नमस्कृत्य भिक्षार्थमागन्तव्यमिति प्रोक्तवान् । पुनर्मण्डनमिश्रं प्रति, अरे मण्डनमिश्र, अन्नभिक्षार्थं नागतः । किन्तु वादभिक्षार्थमागतोऽस्मीति यतिर्भणितवान् । ततः शङ्करवचनमाकर्ण्य तं प्रति भो यतिवरेण्य, ममापराधं क्षन्तुमर्हसि । अद्य पितुर्दिनम् । श्वः स्नानानन्तरं वादो भविष्यति इति वचनमङ्गीकृत्य शङ्करस्तथा भवत्विति निर्गत्य शिष्यैः सह भिक्षामटित्वा तत्रैव तद्दिनं स्थितवान् ।

ततः कर्मादिकं कृत्वा शिष्यैः सह समागतः ।
गृहं मण्डनमिश्रस्य शङ्करो लोकशङ्करः ॥१७॥
वादार्थमागतोऽस्मीति वाक्यं श्रुत्वा समाहितः ।
नमस्कृत्य स तं प्राह यथेच्छसि तथा कुरु ॥१८॥
साक्षी को वा प्रसङ्गेऽस्मिन् वादिनोरुभयोरपि ।
इति श्रुत्वा शङ्करोऽपि पुनः प्राह च तं प्रति ॥१९॥
आवयोरुभयोर्मध्ये तव पत्न्येव साक्षिणी ।
पराजयो यदि मम गार्हस्थ्यं मे भवेत्पुनः ॥२०॥
पराजयो यदि तव संन्यासित्वं भवेदिति ।
प्रतिज्ञा चाऽभवत्तत्र वादिनोरुभयोरपि ॥२१॥

मण्डनमिश्रः– अश्वालम्भं गवालम्भं संन्यासं पलपैतृकम् ।
देवरेण सुतोत्पत्तिं कलौ पञ्च विवर्जयेत् ॥२२॥
इत्यादि बहुधाकारे वेदशास्त्रादिषु क्रमात् ।
प्रोक्ते मण्डनमिश्रेण श्रुत्वा प्राह स शङ्करः ॥२३॥
यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते ।
संन्यासश्चाग्निहोत्रं च तावदेव कलौ युगे ॥२४॥

सशिखं वपनं कृत्वा बहिः सूत्रं त्यजेद्बुधः ।
यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत् ॥२५॥

सूचनात्सूत्रमित्याहुः सूत्रं नाम परं पदम् ।
तत्सूत्रं विदितं येन स विप्रो वेदपारगः ॥२६॥

ज्ञानेन शिखिनो नित्यं ज्ञानयज्ञोपवीतिनः ।
ज्ञानमेव परं तेषां पवित्रं ज्ञानमुच्यते ॥२७॥

अग्नेरिव शिखा नान्या यस्य ज्ञानमयी शिखा ।
स शिखीत्युच्यते विद्वानितरे केशधारिणः ॥२८॥

कुटुम्बं पुत्रदाराश्च वेदाङ्गानि च सर्वशः ।
यज्ञं यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः ॥२९॥

इत्यादि बहुधा वादं श्रुत्वा वाणी तु साक्षिणी ।
भर्तुः पराजयं दृष्ट्वा भिक्षार्थं तावुभावपि ॥३०॥

उत्तिष्ठतमिति प्राह वन्दित्वा विनयान्विता ।
ततो मण्डनमिश्रस्य संन्यासं विधिना गुरुः ॥३१॥

लोके सुरेश्वराख्यां च कारयामास शङ्करः ॥

शिष्यैः समस्तैः परिगीयमानः । समागतः सिद्धपुरं प्रसिद्धम् ।
जित्वा ययौ मण्डनमिश्रसंज्ञम् । जेष्यामि वाणीमिति मोदमानः ॥३२॥

॥ इति श्रीशङ्करविजयसङ्ग्रहे मण्डनमिश्रविजयो नाम चतुर्थोऽध्यायः ॥